# संस्कृतम् (ऐच्छिकम्, कोड-सङ्ख्या - 022)
## आदर्श-प्रश्नपत्रम् *
## कक्षा - द्वादशी (2026-27)

**अवधिः - होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति।
- अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति।

| | |
|---|---|
| **खण्डः (क) अपठितावबोधनम्** | **- 10 अङ्काः** |
| **खण्डः (ख) रचनात्मककार्यम्** | **- 10 अङ्काः** |
| **खण्डः (ग) अनुप्रयुक्तव्याकरणम्** | **- 15 अङ्काः** |
| **खण्डः (घ) (i) पठितावबोधनम्** | **- 25 अङ्काः** |
| **(ii) संस्कृतसाहित्येतिहासपरिचयः** | **- 10 अङ्काः** |
| **खण्डः (ङ) छन्दोऽलङ्कारपरिचयः** | **- 10 अङ्काः** |

- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## खण्डः - ‘क’
## अपठितावबोधनम् 10 अङ्काः

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत -**<br>अखिलभारतस्य सञ्चारं कृत्वा विवेकानन्देन नैके अनुभवाः प्राप्ताः। तेषां निष्पीडनात् तेन आविष्कृतम् इदमेकं सत्यं यत् 'आध्यात्मिकता एव भारतस्य मेरुदण्डः' इति। तादृशः महिमा भारतस्य धुरि विद्यते चेदपि देशवासिषु, समाजे, राष्ट्रस्य सर्वक्षेत्रेषु अपि कुतः एतावान् कलहः, क्षोभः, विप्लवः च? एतादृशी भेदभावना कुतः? एतस्य विरोधस्य परिहारः साध्यः उत न ?' इति चिन्ताक्रमः स्वामिनो मनसि जातः। परिहारस्य अन्वेषणं करणीयम् एव इति दृढमतिं कृत्वा सः विचारसमुद्रम् अवगाहितवान्। युगपद् एव कन्याकुमार्याः तरङ्गितसमुद्रेऽपि | 10 |

*अवधेयम् - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

| | | |
|---|---|---|
| | कूर्दितवान्। यथा कश्चित् पिता माता इव मृदुतया शिशुं ग्रहीतुम् अजानन् उत्क्षेपणादिकं कृत्वा शिशुना सह क्रीडति तथैव तरङ्गाः अपि पातनोत्पातनपूर्वं तम् इतस्ततः अघूर्णयन्। न केवलं बाह्यतरङ्गाः, राष्ट्रस्य दुःस्थितिरूपाः आन्तरिकचिन्तातरङ्गाः अपि तस्य चित्तम् अमथ्नन्। त्रयाणां समुद्राणां सङ्गमे दीर्घकालं तरणं कृत्वा सः एकस्यां शिलायाम् उपाविशत्। भारतीयपरम्परायाः दृश्यानि, भारतेतिहासस्य उन्नत्यवनत्योः च दृश्यानि क्रमशः तस्य चित्तादर्शे प्रतिबिम्बितानि अभवन्। | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×1=2 |
| | (i) विरोधस्य परिहारस्य किं करणीयम्? | |
| | (ii) विवेकानन्दः कस्याः तरङ्गितसमुद्रेऽपि कूर्दितवान्? | |
| | (iii) भारतेतिहासस्य कयोः दृश्यानि प्रतिबिम्बितानि अभवन्? | |
| | **(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) भारतस्य सञ्चारं कृत्वा स्वामिना के प्राप्ताः? | |
| | (ii) के स्वामिनः चित्तम् अमथ्नन्? | |
| | (iii) समुद्राणां सङ्गमे स्वामी किं कृतवान्? | |
| | **(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत -** | 1 |
| | **(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत -** | 3×1=3 |
| | (क) "तेन नैके अनुभवाः प्राप्ताः" इत्यस्मिन् वाक्ये 'तेन' इति सर्वनामपदं कस्मै प्रयुक्तम्? | |
| | (i) समयाय (ii) विवेकानन्दाय | |
| | (iii) भारताय (iv) राष्ट्राय | |
| | (ख) 'तादृशः' इति विशेषणपदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम् ? | |
| | (i) पिता (ii) मेरुदण्डः | |
| | (iii) अनुभवः (iv) महिमा | |
| | (ग) 'प्रस्तरे' इत्यस्यस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ? | |
| | (i) शिलायाम् (ii) मृदुतया | |
| | (iii) चित्तादर्शे (iv) धुरि | |
| **खण्डः - 'ख'**<br>**रचनात्मककार्यम् 10 अङ्काः** | | |
| 2. अ | **भवान् अनिकेतः। भवतः पिता नूतनं गृहं क्रीतवान्। भवान् गृहप्रवेशोत्सवार्थं निमन्त्रयितुं स्वमित्रं महेशं प्रति पत्रमेकं प्रदत्तसङ्केतानां सहायतया संस्कृतभाषया लिखतु।** | 5 |
| | **मञ्जूषा** | |

*अवधेयम् - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

| | | |
|---|---|---|
| | सस्नेहम्, प्रियमित्र, कुशली, सपरिवारम्, सर्वगतं कुशलम्, अस्मिन् शीतावकाशे, आयोजनम्, प्रातःकालाद् आरभ्य, यज्ञम्, कलशस्थापना, विशालम्, पृथक् प्रकोष्टः, व्यवस्थितम्, निर्व्याजम्, नूतनगृहम्, विकासपुरीतः, सर्वेऽपि, सम्बन्धिनः, सहभोजः, आनन्ददायकम्, ब्राह्मणैः, सम्पत्स्यते, आगमनम्, उपायनम्, द्वित्रिदिनानि, स्थित्वा। | |
| | **अथवा** | |
| आ | **भवती सुनृता गोहाटीनगरे निवसति। भवत्याः क्षेत्रे उद्यानस्य समीपवर्ति-क्षेत्रेषु केचन असामाजिकाः जनाः तिष्ठन्ति। ते आदिनं मद्यपानं कुर्वन्तः सामान्यजनान् पीडयन्ति। ते मादकद्रव्याणां प्रयोगं विक्रयणं च कुर्वन्ति। तन्निवारणाय स्वस्य क्षेत्रस्य आरक्षकाधिकारिणं प्रति प्रदत्तसङ्केतानां सहायतया संस्कृतभाषया पत्रमेकं लिखत।** | |
| | **मञ्जूषा** | |
| | सेवायाम्, आरक्षकाधिकारिमहोदय, सविनयम्, गोहाटीनगरे, निवसामि, रथ्यासु, सद्य, मार्गेषु, बहुदिनेभ्यः, कठिनम्, दुर्गन्धः, प्रसरति, मद्यपानां प्रकोपः, दुष्करम्, भीतिः, सधन्यवादम्, दुर्घटनायाः, आशङ्का, बालिकाः, यथाशीघ्रम्, विशिष्टम् अवधानम्, काचित् समस्या, घटिता, न स्यात्, असुरक्षायाः भावः, महिलाः, गमनागमनम् । | |
| | | |
| 3. अ | **प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य पञ्चविंशतितः त्रिंशत्-शब्दात्मकम् अनुच्छेदमेकं संस्कृतेन लिखत -**<br>**विषयः - जलमेव जीवनम्**<br>जीवने जलस्य महत्त्वम्<br>जनस्य स्रोतांसि<br>जलस्य विवेकपूर्णः प्रयोगः<br>जलप्रदूषणं निवारयितुम् उपायाः<br>उपसंहारः | 5 |
| | **अथवा** | |
| आ | **हिन्दीभाषया आङ्ग्लभाषया वा लिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत।**<br>1. रामायण और महाभारत भारतीय साहित्य के मूलस्रोत हैं।<br>Ramayana and Mahabharata are the original sources of Indian literature.<br>2. भारत की पुण्यभूमि पर ही वेदों का आविर्भाव हुआ था।<br>The Vedas manifested only on the holy land of India.<br>3. हमें नदियों की रक्षा करनी चाहिए।<br>We should protect the rivers.<br>4. तुम सब विद्यालय कब जाओगे? | |

| | | |
|---|---|---|
| | When will you all go to school?<br>5. सब लोग सुखी और नीरोग हों।<br>May everyone be happy and healthy. | |
| | **खण्डः - 'ग'**<br>**अनुप्रयुक्तव्याकरणम् 15 अङ्काः** | |
| 4. अ | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।**<br>(क) अद्य कक्षायां **कोऽपि** विशिष्टः कार्यक्रमः?<br>(ख) **वयम् + सर्वे** योगस्य उपयोगितायाः विषये सम्यग्रूपेण ज्ञातुम् उत्सुकाः स्मः।<br>(ग) जनस्य साकेतनिवासिनस्तौ **द्वावपि** अभूतामभिनन्द्यसत्त्वौ।<br>**अथवा** | 3×1=3 |
| आ | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।**<br>(क) **प्रायः + तव** आगमनसमये अहं न स्थास्यामि।<br>(ख) कार्यं समाप्य स्वगृहं **प्रत्यागमनञ्च** तस्य वैशिष्ट्यमासीत्।<br>(ग) शिष्टानध्याय **इति + अस्खलितं** खेलतां बटूनां कोलाहलः। | |
| 5. | **रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत।**<br>(क) छात्राः अपि हृष्टमनसा परस्परं योगचर्चां **कुर्वाणाः** सन्ति।<br>(i) कृ + क्तवतु (ii) कृ + शानच्<br>(iii) कृ + क्त (iv) कृ + शतृ<br>(ख) मम पूर्वतनं पत्रं त्वया **प्र + आप् + क्त** स्यात्।<br>(i) प्राप्तः (ii) प्राप्नुवन्<br>(iii) प्राप्तम् (iv) प्राप्तिः<br>(ग) योगविषये काऽपि **विशिष्टा** जिज्ञासा अस्ति किम् ?<br>(i) विशिष्ट + टाप् (ii) विशिष्ट + ङीप्<br>(iii) विशिष्ट + यत् (iv) विशिष्ट + क्त | 3×1=3 |
| 6. | **मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत।**<br>(क) अश्वोऽश्व' इति नाम पशुसमाम्नाये सांग्रामिके ............ पठ्यते।<br>(ख) भवादृशा .......... भवन्ति भाजनान्युपदेशानाम्।<br>(ग) एवं सकलगुणनिवासः स विक्रमो राजा ......... स्वमनस्यचिन्तयत्।<br>**मञ्जूषा**<br>एव, च, एकदा। | 3×1=3 |

*अवधेयम् - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

| | | |
|---|---|---|
| 7. अ | **कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत।**<br>(क) .......... (उपार्जित) वित्तानां त्याग एव हि रक्षणम्।<br>(ख) ते .......... (हितवादिन्) कुप्यन्ति।<br>(ग) अहं तस्मै .......... (राजन्) व्ययार्थं रत्नचतुष्टयं दास्यामि।<br>**अथवा** | 3×1=3 |
| आ | **कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत।**<br>(क) अलं ................ (चिन्ता), अहम् एकैकं कृत्वा बोधयामि।<br>(ख) श्रीनायारः ......... (केरल) प्रति गमनाय इच्छां न प्रकटितवान्।<br>(ग) दृढसङ्कल्पोऽयं सादी (अश्वारोही) न ......... (स्वकार्य) विरमति। | |
| | | |
| 8. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समस्तपदं वा चित्वा लिखत।**<br>(क) भो भोः ! तत् किम् **<u>अक्षत्रिया</u>** पृथिवी?<br>(i) न क्षत्रिया (ii) क्षत्रियाणाम् अभावः<br>(iii) क्षत्रियाणां योग्यम् (iv) क्षत्रियैः रहिताः<br>(ख) तस्माद्योगाय युज्यस्व योगः **<u>कर्मसु कौशलम्</u>**।<br>(i) कर्मन्कौशलम् (ii) कर्मकुशलम्<br>(iii)कर्मणकौशलम् (iv) कर्मकौशलम्<br>(ग) चन्द्रपीडः **<u>प्रीतहृदयो</u>** स्वभवनमाजगाम।<br>(i) प्रीतं हृदयं यस्मै सः (ii) प्रीतम् हृदयम्<br>(iii) प्रीतं हृदयं यस्य सः (iv) प्रीतः हृदयः यस्मात् सः | 3×1=3 |
| | **खण्डः - (घ)**<br>(i) **पठितावबोधनम् 25 अङ्काः** | |
| 9. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -**<br>अस्मिन् समये एकः षोडशवर्षदेशीयो गौरो युवा हयेन पर्वतश्रेणीरुपर्युपरि गच्छति स्म। एष सुघटितदृढशरीरः श्याम-श्यामैर्गुच्छ-गुच्छैः कुञ्चित-कुञ्चितैः कच-कलापैः कमनीय-कपोलपालिः दूरागमनायासवशेन सूक्ष्म-मौक्तिक-पटलेनेव स्वेदबिन्दु-व्रजेन समाच्छादित-ललाट-कपोल-नासाग्रोत्तरोष्ठः प्रसन्नवदनाम्भोज-प्रदर्शित-दृढसिद्धान्त-महोत्साहः कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति। तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायंसमयप्रयुक्तः स्वभाव-वृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः। झञ्झावातोद्धूतैः रेणुभिः शीर्णपत्रैः कुसुमपरागैः शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः। | 5 |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) सैनिकः किम् आदाय तोरणदुर्गं प्रयाति? | 2×½=1 |

| | | |
|---|---|---|
| | (ii) युवा हयेन कुत्र गच्छति स्म?<br>(iii) युवा कस्य विश्वासपात्रम् आसीत्?<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) सैनिकस्य ललाट-कपोलौ केन आच्छादितौ आस्ताम्?<br>(ii) सायङ्कालीनः अन्धकारः कथं द्विगुणितः जातः?<br>(iii) सैनिकस्य कपोलपाली कीदृशैः कचकलापैः कमनीये स्तः?<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) 'गच्छति स्म' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?<br>(ii) 'अश्वेन' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत।<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) 'महान्' इति पदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्?<br>(ii) 'षोडशवर्षदेशीयः' इति पदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्? | <br><br>2×1=2<br><br><br><br>2×1=2 |
| 10. | अधोलिखितं पद्यद्वयं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -<br>**जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।**<br>**गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च॥**<br>**गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च जले च पद्मम्।**<br>**इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्यो यस्य मित्रं न हि तस्य दूरम् ॥**<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्<br>(i) कः अधिकप्रदाता आसीत्?<br>(ii) कुमुदस्य बन्धुः कः?<br>(iii) पयोदः कुत्र तिष्ठति?<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) रघु-कौत्सौ कस्य अभिनन्दनीयौ अभवताम्?<br>(ii) नृपः कौत्साय कियद् धनम् अयच्छत्?<br>(iii) कलापिनः मित्रं कः अस्ति?<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) 'द्वौ' इति कर्तृपदस्य क्रियापदं श्लोके किं प्रयुक्तम्?<br>(ii) 'नृपः' इति पदस्य विशेषणपदं श्लोके किं प्रयुक्तम्?<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) 'नभसि' इति अर्थे श्लोके किं पदं प्रयुक्तम्?<br>(ii) 'शत्रुः' इति पदस्य विपर्ययपदं श्लोके किं पदं प्रयुक्तम्? | 5<br><br><br><br><br>2×½=1<br><br><br><br>2×1=2<br><br><br><br>2×1=2 |

| | | |
|---|---|---|
| 11. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -**<br>**अरुन्धतीजनकौ** - महत्कौतुकं वत्सस्य।<br>**कौशल्या** - अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति! जानामि तं पश्यन्ती वञ्चितेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम्।<br>**अरुन्धती** - अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते? (प्रविश्य)<br>**बटवः** - पश्यतु कुमारस्तावदाश्चर्यम्।<br>**लवः** - दृष्टमवगतं च। नूनमाश्मेधिकोऽयमश्वः।<br>**बटवः** - कथं ज्ञायते?<br>**लवः** - ननु मूर्खाः! पठितमेव हि युष्माभिरपि तत्काण्डम्। किं न पश्यथ? प्रत्येकं शतसङ्ख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः। यदि च विप्रत्ययस्तत्पृच्छत।<br>**बटवः** - भो भोः! किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति?<br>**लवः** - (सस्पृहमात्मगतम्)'अश्वमेध' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः। | 5 |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्**<br>(i) लवः कथं दूरम् अतिक्रान्तः अभवत्?<br>(ii) महत्कौतुकं कस्य अभवत्?<br>(iii) कः परिवृतः पर्यटति? | 2×½=1 |
| | **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कौशल्या-अरुन्धती-जनकादयः कैः तोषिताः?<br>(ii) अश्वस्य रक्षितारः के आसन्?<br>(iii) 'अश्वमेध' इति नाम केषाम् उत्कर्षनिकषः? | 2×1=2 |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) 'पर्यटति' इति क्रियापदस्य कर्तृपदं नाट्यांशे किं प्रयुक्तम्?<br>(ii) 'आश्वमेधिकोऽयमश्वः' अत्र विशेषणपदं किं प्रयुक्तम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>(i) 'विद्वांसः' इति पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत।<br>(ii) 'चञ्चलः' इत्यस्य पर्यायपदं संवादात् चित्वा लिखत। | 2×1=2 |
| 12. | **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**<br>(क) ईशावास्यमिदं सर्वं यत्किञ्च **<u>जगत्यां</u>** जगत्।<br>(ख) समाप्तविद्येन **<u>गुरुदक्षिणायै</u>** मया महर्षि-र्विज्ञापितोऽभूद।<br>(ग) भगवतः सुगृहीतनामधेयस्य **<u>वाल्मीकेः</u>** शिष्योऽहम्। | 4×1=4 |

| | | |
|---|---|---|
| | (घ) <u>**कर्मणा**</u> एव हि संसिद्धिमास्थिता जनकादयः। | |
| 13. | अधोलिखितस्य श्लोकस्य अन्वयं लिखत।<br>**उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।**<br>**शूरं कृतज्ञं दृढनिश्चयं च लक्ष्मीः स्वयं वाञ्छति वासहेतोः ॥** | 3 |
| 14. अ<br><br><br><br>आ | अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत।<br>**अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते ।**<br>**ततो भूय इव ते तमो य उ विद्यायां रताः ॥**<br>**अथवा**<br>'शुकनासोपदेशः' इति पाठम् आधृत्य "युवावस्थायाः केषां दोषाणां विषये शुकनासः चन्द्रपीडम् उपदिष्टवान्?" इति सङ्क्षेपेण संस्कृतभाषया लिखत। | 3 |
| | **खण्डः - (घ)**<br>(ii) **संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः 10 अङ्काः** | |
| 15. | अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत।<br>(क) 'सौदरनन्दम्' इति ग्रन्थे कति सर्गाः सन्ति?<br>(i) चतुर्दश (ii) अष्टादश<br>(iii) सप्तदश (iv) चतुर्विंशतिः<br>(ख) 'किरातार्जुनीयम्' कस्य रचना अस्ति?<br>(i) भारवेः (ii) पद्मगुप्तस्य<br>(iii) बिल्हणस्य (iv) बाणभट्टस्य<br>(ग) 'शिशुपालवधम्' इति महाकाव्यस्य रचयिता कः आसीत्?<br>(i) कालिदासः (ii) श्रीहर्षः<br>(iii) भारविः (iv) माघः | 3×1=3 |
| 16. | प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत ।<br>(क) 'नवसाहसाङ्कचरितम्' इत्यस्मिन् महाकाव्ये कस्य राज्ञः वर्णनम् अस्ति?<br>(i) विक्रमादित्यस्य (ii) हर्षवर्धनस्य<br>(iii) यशोवर्मणः (iv) सिन्धुराजस्य<br>(ख) 'नयचन्द्रसूरिः' किम् ऐतिहासिकं महाकाव्यम् अरचयत्?<br>(i) कुमारपालचरितम् (ii) हम्मीर-महाकाव्यम्<br>(iii) मधुराविजयम् (iv) पृथ्वीराजविजयम्<br>(ग) चम्पूकाव्यं किं भवति?<br>(i) गद्यमयम् (ii) पद्यमयम्<br>(iii) गद्यपद्यमयम् (iv) संवादात्मकम् | 3×1=3 |

| | | |
|---|---|---|
| 17. | **प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत।**<br>(क) भट्टनारायणः कं नाटकम् अरचयत्?<br>(i) कर्णभारम् (ii) मुद्राराक्षसम्<br>(iii) वेणीसंहारम् (iv) मालविकाग्निमित्रम्<br>(ख) भरतमुनिः कं ग्रन्थम् अरचयत्?<br>(i) मृच्छकटिकम् (ii) नाट्यशास्त्रम्<br>(iii) मालविकाग्निमित्रम् (iv) मुद्राराक्षसम्<br>(ग) 'शारिपुत्रप्रकरणम्' इति रूपकस्य रचयिता कः अस्ति?<br>(i) शूद्रकः (ii) नागानन्दः<br>(iii) अश्वघोषः (iv) विशाखदत्तः<br>(घ) 'महावीरचरितम्' इति नाटकस्य रचयिता कः अस्ति?<br>(i) भवभूतिः (ii) कालिदासः<br>(iii) भट्टनारायणः (iv) भासः | 4×1=4 |
| | **खण्डः - 'ङ'**<br>**छन्दोऽलङ्कारपरिचयः - 10 अङ्काः** | |
| 18. | **(अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत।**<br>(क) 'अनुष्टुप्' इति छन्दसः एकमुदाहरणं लिखत।<br>(ख) 'मालिनी' इति छन्दसः लक्षणं किम्?<br>(ग) 'रगण' इत्यस्य चिह्नं लिखत।<br>**(आ) अधोलिखितश्लोकपङ्क्तिषु प्रयुक्तं छन्दः परिचीय तस्य नाम लिखत।**<br>(क) महिम्नामेतस्मिन् विनयशिशिरो मौग्ध्यमसृणो।<br>(ख) तमर्चयित्वा विधिवद्विधिज्ञः तपोधनं मानधनाग्रयायी। | 3×1=3<br><br><br><br>2×1=2 |
| 19. | **(अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत।**<br>(क) उपमालङ्कारस्य लक्षणं किम्?<br>(ख) 'श्लिष्टैः पदैरनेकार्थाभिधाने...' इति कस्यालङ्कारस्य लक्षणम्?<br>(ग) भवेत् ............ प्रकृतस्य परात्मना। इति लक्षणं पूरयत।<br>**(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत।**<br>(क) रमते न मरालस्य मानसं मानसं विना।<br>(ख) दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम्। | 3×1=3<br><br><br><br>2×1=2 |

**********************************